श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ द्वादशस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ द्वादशस्तोत्रम् ॥

नमो नमो नृसिंहाय मालोलाय नमो नमः।
नमो नमस्स्वर्णरमानृसिंहाय नमो नमः॥ १ ॥

नमो नमो मङ्गळाद्रिनृसिंहाय नमो नमः।
नमो नमो नृत्ततुष्टश्रीकृष्णाय नमो नमः॥ २ ॥

नमो नमश्शेषशायिरङ्गिणे च नमो नमः।
नमो नमो हस्तिशैलकल्पकाय नमो नमः॥ ३ ॥

नमो नमश्शेषशैलश्रीवासाय नमो नमः।
नमो नमो यादवाद्रिनिवासाय नमो नमः॥ ४ ॥

नमो नमस्सौरभाढ्यरङ्गिणे च नमो नमः।
नमो नमो रमाश्लिष्टवराहाभ्यां नमो नमः॥ ५ ॥

नमो नमो ज्ञानदाय वागीशाय नमो नमः।
नमो नमो भूरमादिकेशवाय नमो नमः॥ ६ ॥

नमो नमो दीप्तरश्मिचक्राय च नमो नमः।
नमो नमस्सगोदाय रङ्गिणे च नमो नमः॥ ७ ॥

नमो नमो जानकीशलक्ष्मणाभ्यां नमो नमः।
नमो नमोऽनन्तसुधामूर्तये च नमो नमः॥ ८ ॥

नमो नमो नृसिंहादिश्रीमूर्तिभ्यो नमो नमः।
नमो नमो विष्णुपादशठारिभ्यां नमो नमः॥ ९ ॥

नमो नमोऽनीकनाथशठजिद्भ्यां नमो नमः।
नमो नमो कलिध्वंसयतीन्द्राभ्यां नमो नमः॥ १० ॥

नमो नमो वेदचूडागुरवेऽस्तु नमो नमः।
नमो नमो वण्शठारियतीन्द्राय नमो नमः॥ ११ ॥

नमो नमस्तदाज्ञप्तयतीन्द्रेभ्यो नमो नमः।
नमो नमो वीररघ्वीड्यतीन्द्राय नमो नमः॥ १२ ॥

रमानृसिंहभक्तस्य वेदचूडागुरोर्यतेः।
कृतिरेषा चिरं जीयात् पद्यैः द्वादशभिर्युता॥ १३ ॥

॥ इति द्वादशस्तोत्रम् समाप्तम् ॥